(1)

# अथामरकोशातृतीयकांडप्रारंभः

the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan

(2)

अ॰को॰ श्रीगणेशायनमः ॥ ॥ विशेष्यनिघ्नैःसंकीर्णैर्नानार्थैरव्ययैरपि ॥ लिंगादिसंग्रहैर्वर्गाः सामान्येवर्गसंश्रया: ॥ १ ॥ स्त्रीदाराद्यैर्य तृ॰का॰
१ द्विशेष्यंयादृशैःप्रस्तुतंपदे: ॥ गुणद्रव्यक्रियाशब्दास्तथास्युस्तस्यभेदकाः ॥ २ ॥ सुकृतीपुण्यवान्धन्योमहेच्छस्तुमहाशयः ॥ हृद
दयालुःसुहृदयोमहोत्साहोमहोद्यमः ॥ ३ ॥ प्रवीणेनिपुणाभिज्ञविज्ञनिष्णातशिक्षिताः ॥ वैज्ञानिकःकृतमुखःकृतीकुशलइत्यपि
॥ ४ ॥ पूज्यःप्रतीक्ष्यःसांशयिकःसंशयापन्नमानसः ॥ दक्षिणीयोदाक्षिण्यार्हस्तत्रदक्षिण्यइत्यपि ॥ ५ ॥ स्युर्वदान्यःस्थूललक्ष्यदान
शौंडाबहुप्रदे ॥ जैवातृकःस्यादायुष्मानंतर्वाणिस्तुशास्त्रवित् ॥ ६ ॥ परीक्षकःकारणिकोवरदस्तुसमर्द्धकः ॥ हर्षमाणोविकुर्वाणः
प्रमनाहृष्टमानसः ॥ ७ ॥ दुर्मनाविमनाअंतर्मनाःस्यादुत्कउन्मनाः ॥ दक्षिणेसरलोदारौसुकलोदातृभोक्तरि ॥ ८ ॥ तत्परेप्रसिता
सक्ताविष्टार्थोद्युक्तउत्सुकः ॥ प्रतीतेप्रथितख्यातवित्तविज्ञातविश्रुताः ॥ ९ ॥ गुणैःप्रतीतेतुकृतलक्षणाहतलक्षणौ ॥ इभ्यआ
ढ्योधनीस्वामीत्वीश्वरःपतिरीशिता ॥ १० ॥ अधिभूर्नायकोनेताप्रभुःपरिवृढोधिपः ॥ अधिकर्द्धिःसमृद्धःस्यात्कुटंबव्यापृतस्तु
यः ॥ ११ ॥ स्यादभ्यागारिकस्तस्मिन्नुपाधिश्चपुमानयम् ॥ वरांगरूपोपेतोयःसिंहसंहननोहिसः ॥ १२ ॥ निर्वार्यःकार्यकर्तायःसत्वंनः
सत्वसंपदा ॥ अवाचिमूकोथमनोजवसःपितृसन्निभः ॥ १३ ॥ सत्कृत्यालंकृतांकन्यांयोददातिसकूकुदः ॥ लक्ष्मीवाँल्लक्ष्मणःश्रीलः १
श्रीमान्स्निग्धस्तुवत्सलः ॥ १४ ॥ स्याद्दयालुःकारुणिकःकृपालुःसूरतःसमाः ॥ स्वतंत्रोपावृतःस्वैरीस्वच्छंदोनिरवग्रहः ॥ १५ ॥ प

“Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.”

(2A)

रतंत्रःपराधीनःपरवान्नाथवानपि॥अधीनोनिघ्नआयत्तोस्वच्छंदोगृह्यकोप्यसौ॥१६॥खलपूःस्याद्बहुकरोदीर्घसूत्रश्चिरक्रि
यः॥जाल्मोसमीक्ष्यकारीस्यात्कुंठोमंदःक्रियासुयः॥१७॥कर्मक्षमोलंकर्मीणःक्रियावान्कर्मसूद्यतः॥सकार्मःकर्मशीलोयःक
र्मशूरस्तुकर्मठः॥१८॥भरण्यभुक्कर्मकरःकर्मकारस्तुतत्क्रियः॥अपस्नातोमृतस्नातआमिषाशीतुशौष्कुलः॥१९॥बुभुक्षितः-
स्यात्क्षुधितोजिघत्सुरशनायितः॥परान्नःपरपिंडादोभक्षकोघस्मरोद्मरः॥२०॥आद्यूनःस्यादौदरिकोविजिगीषाविवर्जिते
॥उभौत्वात्मंभरिःकुक्षिंभरिःस्वोदरपूरके॥२१॥सर्वान्नीनस्तुसर्वान्नभोजीगृध्नस्तुगर्धनः॥लुब्धोभिलाषुकस्तृष्णक्समौलोलु
पलोलुभौ॥२२॥सोन्मादस्तून्मादिष्णुःस्यादविनीतःसमुद्धतः॥मत्तेशौंडोत्कटक्षीबाःकामुकेकमितानुकः॥२३॥कम्रःकामयि
ताभीकःकमनःकामनोभिकः॥विधेयोविनयग्राहीवचनेस्थितआश्रवः॥२४॥वश्यःप्रणेयोनिभृतविनीतप्रश्रिताःसमाः॥धृ
ष्टेधृष्णग्वियातश्चप्रगल्भःप्रतिभान्विते॥२५॥स्यादधृष्टेतुशालीनोविलक्षोविस्मयान्विते॥अधीरेकातरस्त्रस्तेभीरुभीरु
कभीलुकाः॥२६॥आशंसुराशंसितरिगृहयालुर्ग्रहीतरि॥श्रद्धालुःश्रद्धयायुक्तेपतयालुस्तुपातुके॥२७॥लज्जाशीलेपत्रपि
ष्णुर्वंदारुरभिवादके॥शरारुर्घातुकोहिंस्रःस्याद्वर्द्धिष्णुस्तुवर्द्धनः॥२८॥उत्पतिष्णुस्तूत्पतितालंकरिष्णुस्तुमंडनः॥भूष्णुर्भ
विष्णुर्भवितावर्तिष्णुर्वर्त्तनःसमौ॥२९॥निराकरिष्णुःक्षिप्नुःस्यात्सांद्रःस्निग्धस्तुमेदुरः॥ज्ञातातुविदुरोविंदुर्विकासीतुविकस्वरः

अ॰को॰ ॥३०॥विसृत्वरोविसृमरःप्रसारीचविसारिणी॥सहिष्णुःसहनःक्षंतातितिक्षुःक्षमिताक्षमी॥३१॥क्रोधनोमर्षणःकोपीचं त्र॰कां॰
२ डस्त्वत्यंतकोपनः॥जागरूकोजागरिताघूर्णितःप्रचलायितः॥३२॥स्वप्नक्शयालुर्निद्रालुर्निद्राणशयितौसमौ॥पराङ्मुखःप
(3) राचीनःस्याद्वाङप्यधोमुखः॥३३॥देवानंचतिदेवद्र्यङ्विष्वद्र्यङ्विष्वगंचति॥यःसहांचतिसध्र्यङ्ससातिर्यङ्यस्तिरोंच
ति॥३४॥वदोवदावदोवक्तावागीशोवाक्पतिःसमौ॥वाचोयुक्तिपटुर्वाग्मीवावदूकोतिवक्तरि॥३५॥स्याज्जल्पाकस्तुवाचालो
वाचाटोबहुगर्ह्यवाक्॥दुर्मुखेमुखराबद्धमुखौशक्लःप्रियंवदे॥३६॥लोहलःस्यादस्फुटवाग्गर्ह्यवादीतुकद्वदः॥समौकुवाद
कुचरौस्यादसौम्यस्वरोस्वरः॥३७॥रवणःशब्दनोनांदीवादीनांदीकरःसमौ॥जडोज्ञएकमूकस्तुवक्तुंश्रोतुमशिक्षिते॥३८॥तू
ष्णींशीलस्तुतूष्णीकोनग्नोवासादिगंबरे॥निष्कासितोवकृष्टःस्यादपध्वस्तस्तुधिक्कृतः॥३९॥आत्तगर्वोभिभूतःस्याद्दापितः
साधितःसमौ॥प्रत्यादिष्टोनिरस्तःस्यात्प्रत्याख्यातोनिराकृतः॥४०॥निकृतःस्याद्विप्रकृतोविप्रलब्धस्तुवंचितः॥मनोहतःप्र
तिहतःप्रतिबद्धोहतश्चसः॥४१॥अधिक्षिप्तःप्रतिक्षिप्तोबद्धेकीलितसंयतौ॥आपन्नआपत्प्राप्तःस्यात्कांदिशीकोभयद्रुतः॥४२॥
आक्षारितःक्षारितोभिशस्तेसंकसुकोस्थिरे॥व्यसनार्तोपरक्तौद्वौविहस्तव्याकुलौसमौ॥४३॥विक्लवोविह्वलःस्यात्तुविवशोरि २
ष्टदुष्टधीः॥कश्यःकशार्हेसन्नद्धेत्वाततायीवधोद्यते॥४४॥द्वेष्येत्वक्षिगतोवध्यःशीर्षच्छेद्यइमौसमौ॥विष्योविषेणयोवध्यो-

(3A)

मुसल्यौमुसलेनयः ॥ ४५॥ शिम्बिदानोकृष्णकर्मान्चपलश्चिकुरःसमौ ॥ दोषैकदृक्पुरोभागीनिकृतस्त्वनृजुःशठः ॥ ४६॥
कर्णेजपःसूचकःस्यात्पिशुनोदुर्जनःखलः ॥ नृशंसोघातुकःक्रूरःपापोधूर्तस्तुवंचकः ॥ ४७॥ अज्ञेमूढयथाजातमूर्खवैधेयबा
लिशाः ॥ कदर्येकृपणक्षुद्रकिंपचानमितंपचाः ॥ ४८॥ निस्वस्तुदुर्विधोदीनोदरिद्रोदुर्गतोपिसः ॥ वानीपकोयाचनकोमार्गणो
याचकार्थिनौ ॥ ४९॥ अहंकारवानहंयुःशुभंयुस्तुशुभान्वितः ॥ दिव्योपपादुकादेवानृगवाद्याजरायुजाः ॥ ५०॥ स्वेदजाःकृमि
दंशाद्याःपक्षिसर्पादयोंडजाः ॥ ॥ इतिप्राणिवर्गः ॥ ॥ उद्भिदस्तरुगुल्माद्याउद्भिदुद्भिज्जमुद्भिदम् ॥ ५१॥ सुंदरंरुचिरंचारु
सुषमंसाधुशोभनम् ॥ कांतंमनोहरंरुच्यंमनोज्ञंमंजुमंजुलम् ॥ ५२॥ तदासेचनकंतृप्तेर्नास्त्यंतोयस्यदर्शनात् ॥ अभीष्टेभीप्सि
तंहृद्यंदयितंवल्लभंप्रियम् ॥ ५३॥ निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः ॥ कुपूयकुत्सितावद्यखेटगर्ह्याणकाःसमाः ॥ ५४॥ म
लीमसंतुमलिनंकच्चरंमलदूषितम् ॥ पूतंपवित्रंमेध्यंचवीध्रंतुविमलार्थकम् ॥ ५५॥ निर्णिक्तंशोधितंमृष्टंनिःशोध्यमनवस्करम् ॥
असारंफल्गुशून्यंतुवशिकंतुच्छरिक्तके ॥ ५६॥ क्लीबेप्रधानंप्रमुखप्रवेकानुत्तमोत्तमाः ॥ मुख्यवर्यवरेण्याश्चप्रवर्होनवराध्यर्ववत्
॥ ५७॥ परार्ध्याग्र्यप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियम् ॥ श्रेयान्श्रेष्ठःपुष्कलःस्यात्सत्तमश्चातिशोभने ॥ ५८॥ स्युरुत्तरपदेव्याघ्रपुंग
वर्षभकुंजराः ॥ सिंहशार्दूलनागाद्याःपुंसिश्रेष्ठार्थगोचराः ॥ ५९॥ अप्राग्र्यंद्वयहीनेद्वेअप्रधानोपसर्जने ॥ विशंकटंपृथुबृहद्विशालं

पृथुलंमहत् ॥६०॥वड्रोरुविपुलंपीनपीव्नीतुस्थूलपीवरे॥स्तोकाल्पक्षुल्लकाःसूक्ष्मंश्लक्ष्णंदभ्रंकृशंतनु॥६१॥स्त्रियांमात्रात्रुटिःपुंसि 
लवलेशकणाणवः॥अत्यल्पेल्पिष्ठमल्पीयःकनीयोणीयइत्यपि॥६२॥प्रभूतंप्रचुरंप्राज्यमदभ्रंबहुलंबहु॥पुरुहूःपुरुभूयिष्ठंस्फारंभूय
श्चभूरिच॥६३॥परःशताद्यास्तेयेषांपरासंख्याशतादिकात्॥गणनीयेतुगणेयंसंख्यातेगणितमथसमंसर्वम्॥६४॥विश्वमशेषंकृ-
त्स्नंसमस्तनिखिलाखिलानिनिःशेषम्॥समग्रंसकलंपूर्णमखण्डंस्यादनूनके॥६५॥घनंनिरंतरंसांद्रंपेलवंविरलंतनु॥समीपेनिक
टासन्नसन्निकृष्टसनीडवत्॥६६॥सदेशाभ्याशसविधसमर्यादसवेशवत्॥उपकंठांतिकाभ्यर्णाभ्यग्रा अप्यभितोव्ययम्॥६७॥सं
सक्तेत्वव्यवहितमपदांतरमित्यपि॥नेदिष्ठमंतिकतमंस्याद्दूरंविप्रकृष्टकं॥६८॥दवीयश्चदविष्ठंचसुदूरंदीर्घमायतम्॥वर्त्तुलंनिस्त
लंवृत्तंबंधुरंतून्नतानतम्॥६९॥उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुंगेथवामने॥न्यङ्नीचखर्वह्रस्वाःस्युरवाग्रेवनतानतम्॥७०॥अरा
लंवृजिनंजिह्ममूर्मिमत्कुंचितंनतम्॥आविद्धंकुटिलंभुग्नंवेल्लितंवक्रमित्यपि॥७१॥ऋजावजिह्मप्रगुणौव्यस्तेत्वप्रगुणाकुलौ
॥शाश्वतस्तुध्रुवोनित्यसदातनसनातनाः॥७२॥स्थास्नुःस्थिरतरःस्थेयानेकरूपतयातुयः॥कालव्यापीसकूटस्थःस्थावरोजं
गमेतरः॥७३॥चरिष्णुजंगमचरंत्रसमिंगंचराचरम्॥चलनंकंपनंकंप्रंचलंलोलंचलाचलम्॥७४॥चंचलंतरलंचैवपारिप्लवपरि 
प्लवे॥अतिरिक्तःसमधिकोदृढसंधिस्तुसंहतः॥७५॥कर्कशंकठिनंक्रूरंकठोरंनिष्ठुरंदृढम्॥जरठंमूर्त्तिमन्मूर्त्तंप्रवृद्धंप्रौढमेधि

(5A)

तम्॥७६॥पुराणेप्रतनप्रत्नपुरातनचिरंतनाः॥प्रत्यग्रोभिनवोनव्योनवीनोनूतनोनवः॥७७॥नूत्नश्चसुकुमारंतुकोमलंमृदुलंमृदु॥
अन्वगन्वक्षमनुगेऽनुपदंक्लीबमव्ययम्॥७८॥प्रत्यक्षंस्यादैंद्रियकमप्रत्यक्षमतींद्रियम्॥एकतानोनन्यवृत्तिरेकाग्रैकायनावपि-
॥७९॥अप्येकसर्गएकाग्र्योप्येकायनगतोपिसः॥पुंस्यादिःपूर्वपौरस्त्यप्रथमाद्याअथास्त्रियाम्॥८०॥अंतोजघन्यंचरममंत्यपा
श्चात्यपश्चिमाः॥मोघंनिरर्थकंस्पष्टंस्फुटंप्रव्यक्तमुल्बणम्॥८१॥साधारणंतुसामान्यमेकाकीत्वेकएककः॥भिन्नार्थकाअ
न्यतरएकस्त्वोऽन्येतरावपि॥८२॥उच्चावचंनैकभेदमुच्चंडमविलंबितम्॥अरुंतुदस्तुमर्मस्पृगबाधंतुनिरर्गलम्॥८३॥प्रसव्यं
प्रतिकूलंस्यादपसव्यमपष्ठुच॥वामंशरीरंसव्यंस्यादपसव्यंतुदक्षिणम्॥८४॥संकटंनातुसंबाधःकलिलंगहनंसमे॥संकीर्णेसं
कुलाकीर्णेमुंडितंपरिवापितम्॥८५॥ग्रंथितंसंधितंदृब्धंविसृतंविस्तृतंततम्॥अंतर्गतंविस्मृतंस्यात्प्राप्तप्रणिहितेसमे॥८६॥
वेल्लितप्रेंखिताधूतचलिताकंपिताधुते॥नुत्तनुन्नास्तनिष्ठ्यूताविद्धक्षिप्तेरिताःसमाः॥८७॥परिक्षिप्तंतुनि वृतंमूषितंमुषि
तार्थकम्॥प्रवृद्धप्रसृतंन्यस्तनिसृष्टेगुणिताहते॥८८॥निदिग्धोपचितेगूढगुप्तेगुंठितरूषिते॥द्रुतावदीर्णेउद्गूर्णोद्यतेकाचित
शिक्यिते॥८९॥घ्राणघ्रातेदिग्धलिप्तेसमुदक्तोद्धृतेसमे॥वेष्टितंस्याद्वलयितंसंवीतंरुद्धमावृतम्॥९०॥रुग्णंभुग्नेथनिशितं-
क्ष्णुतशातानितेजिते॥स्याद्विनाशोन्मुखंपक्वंह्रीणह्रीतौतुलज्जिते॥९१॥वृत्तेतुवृत्तव्यावृत्तौसंयोजितउपाहितः॥प्राप्यंगम्यंसमा

साधंस्यन्नंशोणंस्तुतंस्तुतम्॥९२॥संगूढःस्यात्संकलितोवगीतःख्यातगर्हणे॥विविधःस्याद्बहुविधोनानारूपःपृथग्विधः॥९३॥
अवरीणोधिक्कृतश्चाप्यवध्वस्तोवचूर्णितः॥अनायासकृतंफांटंस्वनितंध्वनितंसमे॥९४॥बद्धेसंदानितंमूतमुद्दितंसंदितंसितम्॥नि
ष्पक्वंक्वथितंपाकेक्षीराज्यहविषांशृतम्॥९५॥निर्वाणोमुनिवह्न्यादौनिर्वातस्तुगतेनिले॥पक्कंपरिणतेगूनंहन्नेमीढंतुमूत्रिते॥९६॥
पुष्टेतुपुषितंसोढेक्षांतमुद्वांतमुद्गते॥दांतस्तुदमितेशांतःशमितेप्रार्थितेर्दितः॥९७॥ज्ञप्तस्तुज्ञापितेछन्नश्छादितेपूजितेंचितः॥
पूर्णस्तुपूरितेक्लिष्टःक्लिशितेवसितेसितः॥९८॥प्रुष्टप्लुष्टोषितादग्धेतष्टत्वष्टौतनूकृते॥वेधितच्छिद्रितौविद्धेविन्नवित्तौविचारिते
॥९९॥निष्प्रभेविगतारोकौविलीनेविद्रुतद्रुतौ॥सिद्धेनिर्वृत्तनिष्पन्नौदारितेभिन्नभेदितौ॥१००॥ऊतंस्यूतमुतंचेतित्रितयंतंतुसंत
ते॥स्यादर्हितेनमस्यितनमसितमपचायितार्चितापचितम्॥१०१॥वरिवसितेवरिवस्यितमुपासितंचोपचरितंच॥संतापितसं
तप्तौधूपितधूपायितौचदूनश्च॥१०२॥हृष्टेमत्तस्तृप्तःप्रह्लन्नःप्रमुदितःप्रीतः॥छिन्नंछातंलूनंकृत्तंदातंदितंछितंवृक्णं॥१०३॥
स्रस्तंध्वस्तंभ्रष्टंस्कन्नंपन्नंच्युतंगलितम्॥लब्धंप्राप्तंविन्नंभावितमासादितंचभूतंच॥१०४॥अन्वेषितंगवेषितमन्विष्टंमार्गितं
मृगितम्॥आर्द्रंसार्द्रंक्लिन्नंतिमितंस्तिमितंसमुन्नमुत्तंच॥१०५॥त्रातंत्राणंरक्षितमवितंगोपायितंचगुप्तंच॥अवगणितमवमता ४
वज्ञातेवमानितंचपरिभूते॥१०६॥त्यक्तंहीनंविधुतंसमुज्झितंधूतमुत्सृष्टे॥उक्तंभाषितमुदितंजल्पितमाख्यातमभिहितंलपितम्

(5A)

॥१०७॥बुद्धंबुधितंमनितंविदितंप्रतिपन्नमवसितावगते॥ऊरीकृतमुररीकृतमंगीकृतमाश्रितंप्रतिज्ञातम्॥१०८॥संगीर्णविदितसंश्रु
तसमाहितोपश्रुतोपगतम्॥ईलितशस्तपणायितपनायितप्रणुतपणितपनितानि॥१०९॥अपिगीर्णवर्णिताभिष्टुतेडितानिस्तुतार्था
नि॥भक्षितचर्वितलीढप्रत्यवसितगिलितखादितप्सातम्॥११०॥अभ्यवहृतान्नजग्धग्रस्तग्लस्ताशितंभुक्ते॥क्षेपिष्ठक्षोदिष्ठप्रे
ष्ठवरिष्ठस्थविष्ठबंहिष्ठाः॥१११॥क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहुलप्रकर्षार्थाः॥साधिष्ठद्राघिष्ठस्फेष्ठगरिष्ठह्रसिष्ठवृंदिष्ठाः॥११२॥
बाढव्यायतबहुगुरुवामनवृंदारकातिशये॥ ॥इतिविशेष्यनिघ्नवर्गः॥ ॥प्रकृतिप्रत्ययार्थाद्यैःसंकीर्णेलिंगमुन्नयेत्॥कर्मक्रि
यातत्सातत्येगम्येस्युरपरस्पराः॥१॥साकल्यासंगवचनेपारायणपरायणे॥यदृच्छास्वैरिताहेतुशून्यात्वास्याविलक्षणम्॥२॥
शमथस्तुशमःशांतिर्दांतिस्तुदमथोदमः॥अवदानंकर्मवृत्तंकाम्यदानंप्रवारणम्॥३॥वशक्रियासंवननंमूलकर्मतुकार्मणम्॥वि
धूननंविधुवनंतर्पणंप्रीणनावनं॥४॥पर्याप्तिःस्यात्परित्राणंहस्तधारणमित्यपि॥सेवनंसीवनंस्यूतिर्विदरःस्फुटनंभिदा॥५॥
आक्रोशनमभीषंगःसंवेदोवेदनाननना॥संमूर्च्छनमभिव्याप्तिर्याच्ञाभिक्षार्थनार्दना॥६॥वर्द्धनंछेदनेथद्वेआनंदनसभाजने॥आ
प्रच्छन्नमथाम्नायःसंप्रदायःक्षयेक्षिया॥७॥ग्रहेग्राहोवशःकांतौरक्ष्णस्त्राणेरणःक्वणे॥व्यधोवेधेपचापाकेहवोहूतौवरोवृतौ-
॥८॥ओषःप्लोषेनयोनायेज्यानिर्जीर्णौभ्रमोभ्रमौ॥स्फातिर्वृद्धौप्रथाख्यातौस्पृष्टिःपृक्तौस्रवःस्रवे॥९॥एधासमृद्धौस्फुरणेस्फु

रणाप्रमितौप्रमा॥प्रसूतिःप्रसवेश्च्योतेप्राघारःक्लमथःक्लमे॥१०॥उत्कर्षोऽतिशयेसंधिःश्लेषेविषयआश्रये॥क्षिपायांक्षेपणेंगीर्णिर्गि
रौगुरणमुद्यमे॥११॥उन्नायउन्नयेश्रायःश्रयणेजयनेजयः॥निगादोनिगदेमादोमदउद्वेगउद्भ्रमे॥१२॥विमर्दनंपरिमलोभ्युपप-
त्तिरनुग्रहः॥निग्रहस्तद्विरुद्धस्स्यादभियोगस्त्वभिग्रहः॥१३॥मुष्टिबंधस्तुसंग्राहोडिंबेडमरविप्लवौ॥बंधनंप्रसितिश्चारःस्पर्शस्स्प्र
ष्टोपतप्तरि॥१४॥निकारोविप्रकारस्स्यादाकारस्त्विंगइंगितम्॥परिणामोविकारोद्वेसमेविकृतिविक्रिये॥१५॥अपहारस्त्वपचयः
समाहारःसमुच्चयः॥प्रत्याहारउपादानंविहारस्तुपरिक्रमः॥१६॥अभिहारोभिग्रहणंनिर्हारोभ्यवकर्षणम्॥अनुहारोनुकारःस्या
दर्थस्यापगमेव्ययः॥१७॥प्रवाहस्तुप्रवृत्तिःस्यात्प्रवहोगमनंबहिः॥वियामोवियमोयामोयमःसंयामसंयमौ॥१८॥हिंसाकर्माभि
चारःस्याज्जागर्याजागराद्वयोः॥विघ्नोंतरायःप्रत्यूहःस्यादुपघ्नोंतिकाश्रये॥१९॥निर्वेशउपभोगःस्यात्परिसर्पःपरिक्रिया॥विधु
रंतुप्रविश्लेषोभिप्रायश्छंदआशयः॥२०॥संक्षेपणंसमसनंपर्यवस्थाविरोधनम्॥परिसर्यापरीसारःस्यादास्यात्वासनास्थितिः
॥२१॥विस्तारोविग्रहोव्यासःसचशब्दस्यविस्तरः॥संवाहनंमर्दनंस्याद्विनाशःस्याददर्शनम्॥२२॥संस्तवःस्यात्परिचयःप्रस
रस्तुविसर्पणम्॥नीवाकस्तुप्रयामःस्यात्संनिधिःसन्निकर्षणम्॥२३॥लवोभिलावोलवनेनिष्पावःपवनेपवः॥प्रस्तावःस्यादवसरस्त्र ५
सरःसूत्रवेष्टनम्॥२४॥प्रजनःस्यादुपसरःप्रश्रयप्रणयौसमौ॥धीशक्तिर्निष्क्रमोस्त्रीतुसंक्रमोदुर्गसंचरः॥२५॥प्रत्युत्क्रमःप्रयो

(6A)

गार्थःप्रक्रमःस्यादुपक्रमः॥स्यादभ्यादानमुद्घातआरंभःसंभ्रमस्त्वरा॥२६॥प्रतिबंधःप्रतिष्टंभोवनायस्तुनिपातनम्॥उपलंभ-
स्त्वनुभवःसमालंभोविलेपनम्॥२७॥विप्रलंभोविप्रयोगोविलंबस्त्वतिसर्जनम्॥विश्रावस्तुप्रतिख्यातिरवेक्षाप्रतिजागरः॥२८॥
निपाठनिपठौपाठेतेमस्तेमौसमुंदने॥आदीनवास्रवौक्लेशेमेलकेसंगसंगमौ॥२९॥संवीक्षणंविचयनंमार्गणंमृगणामृगः॥परिरंभः
परिष्वंगःसंश्लेषउपगूहनम्॥३०॥निर्वर्णनंतुनिध्यानंदर्शनालोकनेक्षणम्॥प्रत्याख्यानंनिरसनंप्रत्यादेशोनिराकृतिः॥३१॥उप-
शायोविशायश्चपर्यायशयनार्थकौ॥अर्तनंचऋतीयाचहृणीयाचघृणार्थकाः॥३२॥स्याद्व्यत्यासोविपर्यासोव्यत्ययश्चविपर्य
ये॥पर्यायोऽतिक्रमस्तस्मिन्नतिपातउपात्ययः॥३३॥प्रेषणंयत्समाहूयतत्रस्यात्प्रतिशासनम्॥ससंस्तावःक्रतुषुयास्तुतिभूमि
र्द्विजन्मनाम्॥३४॥निधायतक्ष्यतेयत्रकाष्ठेकाष्ठंसउद्घनः॥स्तंबघ्नस्तुस्तंबघनःस्तंबोयेननिहन्यते॥३५॥आविधोविध्यतेयेन
तत्रविष्वक्समेनिघः॥उत्कारश्चनिकारश्चद्वौधान्योत्क्षेपणार्थकौ॥३६॥निगारोद्गारविक्षावोद्ग्राहास्तुगरणादिषु॥३७॥आरत्य
विरतिविरतयउपरामेथास्त्रियांतुनिष्ठेवः॥निष्ठ्यूतिर्निष्ठेवनंनिष्ठीवनमित्यभिन्नानि॥३८॥जवनेजूतिःसातिस्त्ववसानेस्या
दथज्वरेजूर्तिः॥उदजस्तुपशुप्रेरणमकरणिरित्यादयःशापे॥३९॥गोत्रांतेभ्यस्तस्यवृंदमित्यौपगवकादिकम्॥आपूपिकंशा
ष्कुलिकमेवमाद्यमचेतसाम्॥४०॥माणवानांतुमाणव्यंसहायानांसहायता॥हल्याहलानांब्राह्मण्यवाडव्येतुद्विजन्मनां॥४१॥

द्वेपर्शुकानांपृष्ठानांपार्श्वंपृष्ठमनुक्रमात्॥खलानांखलिनीखल्याप्यथमानुष्यकंनृणाम्॥४२॥ग्रामताजनताधूम्यापाश्यागल्या
पृथक्पृथक्॥अपिसाहस्रकारीषवार्मणाथर्वणादिकम्॥४३॥ ॥इतिसंकीर्णवर्गः॥ ॥नानार्थाःकेपिकांतादिवर्गेष्वेवात्र
कीर्तिताः॥भूरिप्रयोगायेयेषुपर्यायेष्वपितेषुते॥१॥आकाशेत्रिदिवेनाकोलोकस्तुभुवनेजने॥पद्येयशसिचश्लोकःशरेख
ड्गेचसायकः॥२॥जंबुकौक्रोष्टुवरुणौपृथुकौचिपिटार्भकौ॥आलोकौदर्शनद्योतौभेरीपटहमानकौ॥३॥उत्संगचिन्हयोरं
कःकलंकोंकापवादयोः॥तक्षकोनागवर्द्धक्योरर्कःस्फटिकसूर्ययोः॥४॥मारुतेवेधसिब्रध्नेपुंसिकःकंशिरोंबुनोः॥स्यात्पु
लाकस्तुच्छधान्येसंक्षेपेभक्तसिक्थके॥५॥उलूकेकरिणःपुच्छमूलोपांतेचपिच्छकः॥कमंडलौचकरकःसुगतेचविनायकः॥६॥कि
ष्कुर्हस्तेवितस्तौचशूककीटेचवृश्चिकः॥प्रतिकूलेप्रतीकस्त्रिष्वेकदेशेतुपुंस्ययम्॥७॥स्याद्भूतिकंतुभूनिंबेकत्तृणेभूस्तृणेपिच॥
ज्योत्स्निकायांचघोषेचकोशातक्यथकट्फले॥८॥सितेचखदिरेसोमवल्कःस्यादथसिल्हके॥तिलकल्केचपिण्याकोबाल्हीकंरा
मठेपिच॥९॥महेंद्रगुग्गुलूलूकव्यालग्राहिषुकौशिकः॥रुक्तापशंकाःस्वातंकःस्वल्पेपिक्षुल्लकस्त्रिषु॥१०॥जैवातृकःशशांकेपिखु
रप्यश्वस्यवर्तकः॥व्याघ्रेपिपुंडरीकोनायवान्यामपिदीपकः॥११॥शालावृकाःकपिक्रोष्टुश्वानःस्वर्णेपिगैरिकम्॥पीडार्थेपिव्यली
कंस्यादलीकंत्वप्रियेनृते॥१२॥शीलान्वयावनूकेद्वेशल्केशकलवल्कले॥साष्टेशतेसुवर्णानांहेम्न्युरोभूषणेपले॥१३॥दीनारेपिच

(7A)

निष्कोस्त्रीकल्कोस्त्रीशमलैनसोः॥ दंभेप्यथपिनाकोऽस्त्रीशूलशंकरधन्वनोः॥१४॥ धेनुकातुकरेण्वांचमेघजालेचकालिका॥ कारिका
यातनावृत्योः कर्णिकाकर्णभूषणे ॥१५॥ करिहस्तेंगुलौपद्मबीजकोश्यांत्रिषूत्तरे॥ वृंदारकौरूपिमुख्यावेकेमुख्यान्यकेवलाः॥१६॥
स्याद्दांभिकःकौक्कुटिकोयश्चादूरेरितेक्षणः॥ लालाटिकःप्रभोर्भालदर्शीकार्याक्षमश्चयः॥१७॥" भूभृन्नितंबवलयचक्रेषुकटकोऽ
स्त्रियाम्॥ सूच्यग्रेक्षुद्रशत्रौचरोमहर्षेचकंटकः॥१॥ पाकोपक्तिशिशूमध्येरत्नेनेतरिनायकः॥ पर्यंकःस्यात्परिकरेस्याद्व्याघ्रेपिचलु
ब्धकः॥२॥ पेटकस्त्रिषुवृंदेपिगुरौदेश्येचदेशिकः॥ खेटकौग्रामफलकौधीवरेपिचजालिकः॥३॥ पुष्परेणौचकिंजल्कःशुल्कोस्त्री-
स्त्रीधनेपिच॥ स्यात्कल्लोलेप्युत्कलिकावार्ढकंभाववृंदयोः॥४॥ कारिण्यांचापगणिकादारकौबालभेदकौ॥ अंधेप्यनेडमूकःस्याट्टंकौ
दर्पाश्मदारणौ॥५॥" ॥इतिकांतवर्गः॥ ॥मयूरवस्त्रिवटकरज्वालास्वलिबाणौशिलीमुखौ॥ शंखोनिधौललाटास्थ्निकंबौनस्त्री
द्रियेपिखम्॥१८॥ घृणिज्वालेअपिशिखे॥ खांताः॥ शैलवृक्षौनगावगौ॥ आशुगौवायुविशिखौशरार्कविहगाःखगाः॥१९॥ पतंगौप
क्षिसूर्यौचपूगःक्रमुकवृंदयोः॥ पशवोपिमृगावेगःप्रवाहजवयोरपि॥२०॥ परागःकौसुमेरेणौस्नानीयादौरजस्यपि॥ गजेपिनागमातं
गावपांगस्तिलकेपिच॥२१॥ सर्गःस्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु॥ योगःसन्नहनोपायध्यानसंगतियुक्तिषु॥२२॥ भोगःसुखे
स्त्र्यादिभृतावहेश्चफणकाययोः॥ चातकेहरिणेपुंसिसारंगःशबलेत्रिषु॥२३॥ कपौचप्लवगःशापेत्वभिषंगःपराभवे॥ यानाद्यंगेयुगः

पुंसियुगंयुग्मेकृतादिषु ॥२४॥ स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले ॥ लक्ष्यदृष्ट्यास्त्रियांपुंसिगौर्लिंगंचिन्हशेफसोः ॥२५॥ शृंगंप्राधान्य
सान्वोश्चवरांगंमूर्द्धगुह्ययोः ॥ भगंश्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु ॥२६॥ इतिगांताः ॥ परिघः परिघातेस्त्रेप्योघोवृंदेंभसांरये ॥ मूल्ये
पूजाविधावर्घोंहोदुःखव्यसनेष्वघम् ॥२७॥ त्रिष्विष्टेल्पेलघुः ॥ इतिघांताः ॥ काचाःशिक्यमृद्भेददृग्रुजः ॥ विपर्यासेविस्तरेचप्रपंचःपाव
केशुचिः ॥२८॥ मास्यमात्ये चाप्युपधेपुंसिमेध्येसितेत्रिषु ॥ अभिषंगेस्पृहायांचगभस्तौचरुचिः स्त्रियाम् ॥२९॥ इतिचांताः ॥ "प्रसन्ने
भल्लुकेप्यच्छोगुच्छस्तबकहारयोः ॥ परिधानांचलेकच्छोजलप्रांतेत्रिलिंगकः ॥१॥ इतिक्षेपकच्छांताः ॥ कौकितार्क्ष्यावहिभुजौदंत
विप्रांडजाद्विजाः ॥ अजाविष्णुहरच्छागागोष्ठाध्वनिवहाव्रजाः ॥३०॥ धर्मराजौजिनयमौकुंजोदंतेपिनस्त्रियाम् ॥ वलजेक्षेत्रपूर्द्वारे
वलजावल्गुदर्शना ॥३१॥ समेक्ष्मांशेरणेप्याजिःप्रजास्यात्संततौजने ॥ अब्जौशंखशशांकौचस्वकेनित्येनिजंत्रिषु ॥३२॥ इतिजां
ताः ॥ पुंस्यात्मनिप्रवीणेचक्षेत्रज्ञोवाच्यलिंगकः ॥ संज्ञास्याच्चेतनानामहस्ताद्यैश्चार्थसूचना ॥३३॥ इतिञांताः ॥ काकेभगंडौकरटौग
जगंडकटीकटौ ॥ शिपिविष्टस्तुखलतौदुश्चर्मणिमहेश्वरे ॥३४॥ देवशिल्पिन्यपित्वष्टादिष्टंदैवेपिनद्वयोः ॥ रसेकटुःकटुकार्येत्रिषु
मत्सरतीक्ष्णयोः ॥३५॥ रिष्टंक्षेमाशुभाभावेष्वरिष्टेतुशुभाशुभे ॥ मायानिश्चलयंत्रेषुकैतवानृतराशिषु ॥३६॥ अयोघनेशैलशृंगे
सीरांगेकूटमस्त्रियाम् ॥ सूक्ष्मैलायांत्रुटिःस्त्रीस्यात्कालेल्पेसंशयेपिसा ॥३७॥ अत्युत्कर्षाश्रयःकोटयोमूलेलग्नकचेजटा ॥ व्युष्टिः

(8A)

फलेसमृद्धौचदृष्टिर्ज्ञानेक्ष्णिदर्शने॥३८॥इष्टिर्यागेच्छयोःसृष्टंनिश्चितेबहुनित्रिषु॥कष्टेतुकृच्छ्रगहनेदक्षामंदागदेषुच॥३९॥पटुर्द्वौ
वाच्यलिंगौच॥इतिटांताः॥नीलकंठःशिवेपिच॥पुंसिकोष्ठोंतर्जठरंकुसूलोंतर्गृहंतथा॥४०॥निष्ठानिष्पत्तिनाशांताःकाष्ठोत्कर्षेस्थि
तौदिशि॥त्रिषुज्येष्ठोतिशस्तेपिकनिष्ठोतियुवाल्पयोः॥४१॥इतिठांताः॥दंडोस्त्रीलगुडेपिस्याद्गुडोगोलेक्षुपाकयोः॥सर्पमांसात्प
शूव्याडौगोभूवाचस्त्विडाइलाः॥४२॥क्ष्वेडावंशशलाकापिनाडीकालेपिषट्क्षणे॥कांडोस्त्रीदंडबाणार्ववर्गावसरवारिषु॥४३॥-
स्याद्भांडमश्वाभरणेमत्रेमूल्यवणिग्धने॥इतिडांताः॥मूढाप्रतिज्ञयोर्बाढंप्रगाढंभृशकृच्छ्रयोः॥४४॥शक्तस्थूलौत्रिषुदृढौव्यूढौ
विन्यस्तसंहतौ॥इतिढांताः॥भ्रूणोर्भकेस्त्रैणगर्भेबाणोबलिसुतेशरे॥४५॥कणोतिसूक्ष्मेधान्यांशेसंघातेप्रमथेगणः॥पणोद्यूता
दिषूत्सृष्टेभृतौमूल्येधनेपिच॥४६॥मौर्व्यांद्रव्याश्रितेसत्त्वशौर्यसंध्यादिकेगुणः॥निर्व्यापारःस्थितौकालविशेषोत्सवयोःक्षणः॥
४७॥वर्णोद्विजादौशुक्लादौस्तुतौवर्णंतुवाक्षरे॥अरुणोभास्करेपिस्याद्वर्णभेदेपिचत्रिषु॥४८॥स्थाणुःशर्वेप्यथद्रोणःकाकेप्याजौ
रवेरणः॥ग्रामणीर्नापितेपुंसिश्रेष्ठेग्रामाधिपेत्रिषु॥४९॥ऊर्णामेषादिलोम्निस्यादावर्तेचांतराभ्रुवोः॥हरिणीस्यान्मृगीहेमप्रतिमा
हरिताचया॥५०॥त्रिषुपांडौचहरिणःस्थूणास्तंभेपिवेश्मनः॥तृष्णेस्पृहापिपासेद्वेजुगुप्साकरुणेघृणे॥५१॥वणिक्पथेचविपणिः
स्त्राप्रत्यक्चवारुणि॥करेणुरिभ्यांस्त्रीनेभेद्रविणंतुबलंधनम्॥५२॥शरणंगृहरक्षित्रोःश्रीपर्णंकमलेपिच॥विषाभिमरलोहेषु

तीक्ष्णंक्लीबेखरेत्रिषु॥५३॥प्रमाणंहेतुमर्यादाशास्त्रेयत्ताप्रमातृषु॥करणंसाधकतमंक्षेत्रगात्रेंद्रियेष्वपि॥५४॥प्राण्युत्पादेसंसरणम
संबाधचमूगतौ॥घंटापथेथवांतान्नेसमुद्गिरणमुन्नये॥५५॥अतस्त्रिषुविषाणंस्यात्पशुशृंगेभदंतयोः॥प्रवणंक्रमनिम्नोर्व्यांप्रह्वे
नातुचतुष्पथे॥५६॥संकीर्णौनिचिताशुद्धाविरिणंशून्यमूषरम्॥"सितोचवरणोवेणीनदीभेदेकचोच्चये॥५७॥"इतिणांताः॥देव
(१)
सूर्यौविवस्वंतौसरस्वंतौनदार्णवौ॥पक्षितार्क्ष्यौगरुत्मंतौशकुंतौभासपक्षिणौ॥५८॥अग्न्युत्पातौधूमकेतूजीमूतौमेघपर्वतौ॥ह
स्तौतुपाणिनक्षत्रेमरुतौपवनामरौ॥५९॥यंताहस्तिपकेसूतेभर्ताधातरिपोष्टरि॥यानपात्रेशिशौपोतःप्रेतःप्राण्यंतरेमृते॥६०॥
ग्रहभेदेध्वजेकेतुःपार्थिवेतनयेसुतः॥स्थपतिःकारुभेदेपिभूभृद्भूमिधरेनृपे॥६१॥मूर्धाभिषिक्तोभूपेपिऋतुःस्त्रीकुसुमेपिच॥
विष्णावप्यजिताव्यक्तौसूतस्त्वष्टरिसारथौ॥६२॥व्यक्तःप्राज्ञेपिदृष्टांतावुभौशास्त्रनिदर्शने॥क्षत्तास्यात्सारथौद्वाःस्थेक्षत्त्रि
यायांचशूद्रजे॥६३॥वृत्तांतःस्यात्प्रकरणेप्रकारेकार्त्स्न्यवार्तयोः॥आनर्तःसमरेनृत्यस्थाननीवृद्विशेषयोः॥६४॥कृतांतोयमसि
द्धांतदैवाकुशलकर्मसु॥श्लेष्मादिरसरक्तादिमहाभूतानितद्गुणाः॥६५॥इंद्रियाण्यश्मविकृतिःशब्दयोनिश्चधातवः॥कक्षांत
रेपिशुद्धांतोनृपस्यासर्वगोचरे॥६६॥कासूसामर्थ्ययोःशक्तिर्मूर्तिःकाठिण्यकाययोः॥विस्तारवल्ल्योर्व्रततिर्वसतीरात्रिवेश्मनोः ८
॥६७॥क्षयार्च्योरपचितिःसातिर्दानावसानयोः॥अर्तिःपीडाधनुष्कोट्योर्जातिःसामान्यजन्मनोः॥६८॥प्रचारःस्यंदयोरीतिरी

तिर्डिंबप्रवासयोः॥उदयेधिगमेप्राप्तिस्त्रेतात्वग्नित्रयेयुगे॥६९॥वीणाभेदेपिमहतीभूतिर्भस्मनिसंपदि॥नदीनगर्योर्नागानां
भोगवत्यथसंगरे॥७०॥संगेसभायांसमितिःक्षयवासावपिक्षिती॥रवेरर्चिश्चशस्त्रंचवन्हिज्वालाचहेतयः॥७१॥जगती
जगतिश्छंदोविशेषेपिक्षितावपि॥पंक्तिश्छंदोपिदशमंस्यात्प्रभावेपिचायतिः॥७२॥पत्तिर्गतौचमूलेतुपक्षतिःपक्षभेदयोः
॥प्रकृतिर्योनिलिंगेचकैशिक्याद्याश्चवृत्तयः॥७३॥सिकताःस्युर्वालुकापिवेदेश्रवसिचश्रुतिः॥वनिताजनितात्यर्थानुरा
गायांचयोषिति॥७४॥गुप्तिःक्षितिव्युदासेपिधृतिर्धारणधैर्ययोः॥बृहतीक्षुद्रवार्ताकीछंदोभेदेमहत्यपि॥७५॥वासिता
स्त्रीकरिण्योश्चवार्तावृत्तौजनश्रुतौ॥वार्तंफल्गुन्यरोगेचत्रिषुप्सूचघृतामृते॥७६॥कलधौतंरूप्यहेम्नोर्निमित्तंहेतुल-
क्ष्मणोः॥श्रुतंशास्त्रावधृतयोर्युगपर्याप्तयोःकृतम्॥७७॥अत्याहितंमहाभीतिःकर्मजीवानपेक्षिच॥युक्तेक्ष्मादावृतेभू
तंप्राण्यतीतेसमेत्रिषु॥७८॥वृत्तंपद्येचरित्रेत्रिष्वतीतेदृढनिस्तले॥महद्राज्यंचावगीतंजन्येस्याद्गर्हितेत्रिषु॥७९॥श्वेतं-
रूप्येपिरजतंहेम्निरूप्येसितेत्रिषु॥त्रिष्वितोजगदिंगेपिरक्तंनील्यादिरागिच॥८०॥अवदातःसितेपीतेशुद्धेबद्धार्जुनौसितौ॥युक्ते
तिसंस्कृतेमर्षिण्यभिनीतोथसंस्कृतम्॥८१॥कृत्रिमेलक्षणोपेतेप्यनंतोनवधावपि॥ख्यातेहृष्टेप्रतीतोभिजातस्तुकुलजेबुधे॥८२॥
विविक्तौपूतविजनौमूर्छितौमूढसोच्छ्रयौ॥द्वौचाम्लपरुषौशुक्तौशितौधवलमेचकौ॥८३॥सत्येसाधौविद्यमानेप्रशस्तेभ्यर्हितेच

सत्॥ पुरस्कृतः पूजितेरात्यभियुक्तेग्रतः कृते॥८४॥ निवातावाश्रयावातौ शस्त्राभेद्यं च वर्मयत्॥ जातोन्नद्धप्रवृद्धाः स्युरुच्छ्रिता उत्थि
तास्त्वमी॥८५॥ वृद्धिमत्प्रोद्यतोत्पन्ना आदृतौ सादरार्चितौ॥ इति तांताः॥ अर्थोभिधेयरैवस्तुप्रयोजननिवृत्तिषु॥८६॥ निपानागम
योस्तीर्थमृषिजुष्टेजलेगुरौ॥ समर्थस्त्रिषु शक्तिस्थे संबद्धार्थे हितेपि च॥८७॥ दशमीस्थौ क्षीणरागवृद्धौ वीथीपदव्यपि॥ आस्थानी
यत्नयोरास्थाप्रस्थोस्त्री सानुमानयोः॥८८॥ "शास्त्रद्रविणयोर्ग्रंथः संस्थाधारे स्थितौ मृतौ॥" इति थांताः॥ अभिप्रायवशौ छंदावब्दौ जीमूतवत्सरौ॥ अपवादौ तु निंदाज्ञे दायादौ सुतबांधवौ॥८९॥ पादा रश्म्यंघ्रितुर्यांशाश्चंद्राग्न्यर्कास्तमोनुदः॥ निर्वादो जनवादेपि
शादो जंबालशष्पयोः॥९०॥ आरावे रुदिते त्रातर्याक्रंदो दारुणे रणे॥ स्यात्प्रसादोनुरागेपि सूदः स्याद्व्यंजनेपि च॥९१॥ गोष्ठाध्यक्षेपि
गोविंदो हर्षेप्यामोदवन्मदः॥ प्राधान्ये राजलिंगे च वृषांगे ककुदोस्त्रियां॥९२॥ स्त्री संविज्ज्ञानसंभाषाक्रियाकाराजिनामसु॥ धर्मे
रहस्युपनिषत्स्यादृतौ वत्सरे शरत्॥९३॥ पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु॥ गोष्पदं सेविते माने प्रतिष्ठाकृत्यमास्पदम्॥
९४॥ त्रिष्विष्टमधुरौ स्वादू मृदू चातीक्ष्णकोमलौ॥ मूढाल्पापटुनिर्भाग्या मंदाः स्युर्द्वौ तु शारदौ॥९५॥ प्रत्यग्राप्रतिभौ विद्वत्सुप्रग
ल्भौ विशारदौ॥ इति दांताः॥ व्यामो वटश्च न्यग्रोधावुत्सेधः काय उन्नतिः॥९६॥ पर्याहारश्च मार्गश्च विवधौ वीवधौ च तौ॥ परिधिर्यज्ञिय
तरोः शाखायामुपसूर्यके॥९७॥ बंधकं व्यसनं चेतःपीडाधिष्ठानमाधयः॥ स्युः समर्थननीवाकनियमाश्च समाधयः॥९८॥ दोषे सादे ९

नुबंधःस्यात्प्रकृत्यादिविनश्वरे॥मुख्यानुयायिनिशिशौप्रकृतस्यानुवर्तने॥९९॥विधुर्विष्णौचंद्रमसिपरिच्छेदेबिलेऽवधिः॥विधिर्वि
धानेदैवेपिप्रणिधिःप्रार्थनेचरे॥१००॥बुधवृद्धौपंडितेपिस्कंधःसमुदयेपिच॥देशेनदविशेषेब्धौसिंधुर्नासरितिस्त्रियाम्॥१०१॥वि
धाविधौप्रकारेचसाधूरम्येपिचत्रिषु॥वधूर्जायास्नुषास्त्रीचसुधालेपोमृतंस्नुही॥१०२॥संधाप्रतिज्ञामर्यादाश्रद्धासंप्रत्ययःस्पृहा॥
मधुमद्येपुष्परसेक्षौद्रेप्यंधंतमस्यपि॥१०३॥अतस्त्रिषुसमुन्नद्धौपंडितंमन्यगर्वितौ॥ब्रह्मबंधुरधिक्षेपेनिर्देशेथावलंबितः॥१०४॥
अविदूरोप्यवष्टब्धःप्रसिद्धौख्यातभूषितौ॥ इतिधांताः॥सूर्यवन्हीचित्रभानूभानूरश्मिदिवाकरौ॥१०५॥भूतात्मानौधातृदेहौमूर्ख
नीचौपृथग्जनौ॥ग्रावाणौशैलपाषाणौपत्रिणौशरपक्षिणौ॥१०६॥तरुशैलौशिखरिणौशिखिनौवन्हिबर्हिणौ॥प्रतियत्नावुभौलिप्सो
पग्रहावथसादिनौ॥१०७॥द्वौसारथिहयारोहौवाजिनोश्वेषुपक्षिणः॥कुलेप्यभिजनोजन्मभूम्यामप्यथहायनाः॥१०८॥वर्षार्चिर्व्रीहि
भेदाश्चचंद्राग्न्यर्काविरोचनाः॥क्लेशेपिवृजिनोविश्वकर्मार्कसुरशिल्पिनोः॥१०९॥आत्मायत्नोधृतिर्बुद्धिःस्वभावोब्रह्मवर्ष्मच॥शक्रो
घातुकमत्तेभौवर्षुकाब्दोघनाघनः॥११०॥घनोमेघेमूर्तिगुणेत्रिषुमूर्तेनिरंतरे॥अभिमानोर्थादिदर्पेज्ञानेप्रणयहिंसयोः॥१११॥इनःसू
र्येप्रभौराजासृगांकेक्षत्रियेनृपे॥वाणिन्यौनर्तकीदूत्योस्रवंत्यामपिवाहिनी॥११२॥न्हादिन्यौवज्रतडितौवंदायामपिकामिनी॥त्वग्दे
हयोरपितनुःसूनाधोजिव्हिकापिच॥११३॥क्रतुविस्तारयोरस्त्रीवितानंत्रिषुतुच्छके॥मंदेथकेतनंकृत्येकेतावुपनिमंत्रणे॥११४॥वेद

अ॰को॰ स्त्वंतपोब्रह्मब्रह्माविप्रःप्रजापतिः॥उत्साहनेचहिंसायांसूचनेचापिगंधनम्॥११५॥आतंचनंप्रतीवापजवनाप्यायनार्थकम्॥व्यंज तृ॰कां॰
१० नंलांछनंश्मश्रुनिष्ठानावयवेष्वपि॥११६॥स्यात्कौलीनंलोकवादेयुद्धेपश्वहिपक्षिणां॥स्यादुद्यानंनिःसरणेवनभेदेप्रयोजने॥११७॥अ
(11) वकाशेस्थितौस्थानंक्रीडादावपिदेवनम्॥उत्थानंपौरुषेतंत्रेसंनिविष्टोद्गमेपिच॥११८॥व्युत्थानंप्रतिरोधेचविरोधाचरणेपिच॥मारणे
मृतसंस्कारेगतौद्रव्येर्थदापने॥११९॥निर्वर्तनोपकरणानुव्रज्यासुचसाधनम्॥निर्यातनंवैरशुद्धौदानेन्यासार्पणेपिच॥१२०॥व्यस
नंविपदिभ्रंशेदोषेकामजकोपजे॥पक्ष्माक्षिलोम्निकिंजल्केतंत्वाद्यंशेप्यणीयसि॥१२१॥तिथिभेदेक्षणेपर्ववर्त्मनेत्रच्छदेध्वनि॥अ
कार्यगुह्येकौपीनेमैथुनंसंगतौरते॥१२२॥प्रज्ञानंपरमात्माधीःप्रधानंबुद्धिचिन्हयोः॥प्रसूनंपुष्पफलयोर्निधनंकुलनाशयोः॥१२३॥क्रं
दनेरोदनाह्वानेवर्ष्मदेहप्रमाणयोः॥गृहदेहत्विट्प्रभावाधामान्यथचतुष्पथे॥१२४॥संन्निवेशेचसंस्थानंलक्ष्मचिन्हप्रधानयोः॥आ
च्छादनेसंपिधानमपवारणमित्युभे॥१२५॥आराधनंसाधनेस्यादवाप्तौतोषणेपिच॥अधिष्ठानंचक्रपुरप्रभावाध्यासनेष्वपि॥१२६॥
रत्नंस्वजातिश्रेष्ठेपिवनेसलिलकानने॥तलिनंविरलेस्तोकेवाच्यलिंगंतथोत्तरे॥१२७॥समानाःसत्समैकेस्युःपिशुनौखलसूचकौ॥
हीनन्यूनावूनगर्ह्यौवेगिशूरौतरस्विनौ॥१२८॥अभिपन्नोपराद्धोभिग्रस्तव्यापद्गतावपि॥इतिनांताः॥कलापोभूषणेबर्हेतूणीरेसंह १०
तावपि॥१२९॥परिच्छेदेपरीवापःपर्युप्तौसलिलस्थितौ॥गोधुग्गोष्ठपतीगोपौहरविष्णूवृषाकपी॥१३०॥बाष्पमूष्माश्रुकशिपुत्व

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com